International Journal of Sanskrit Research 2020; 6(2): 18-20

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 18-20
© 2020 IJSR
www.anantaajournal.com
Received: 10-01-2019
Accepted: 14-02-2019

**डाँ. अनिलकुमारदाश**
अतिथिअध्यापक, धर्मशास्त्रविभाग:
श्रीजगन्नाथसंस्कृतविश्वविद्यालय, श्री विहार, पुरी, ओडिशा, भारत |

**Corresponding Author:**
**डाँ. अनिलकुमारदाश**
अतिथिअध्यापक, धर्मशास्त्रविभाग:
श्रीजगन्नाथसंस्कृतविश्वविद्यालय, श्री विहार, पुरी, ओडिशा, भारत |

# साम्प्रतिककाले श्राद्धस्य प्रयोजनीयता

**डाँ. अनिलकुमारदाश**

**प्रस्तावना**

धर्मशास्त्रसाहित्यक्षेत्रे पितृदेवतोपासना श्राद्धनाम्ना सुप्रख्यातमस्ति। वैदिककालादारभ्य इयं परम्परा भारतवर्षेऽस्मिन् प्रचलितावर्त्तते। भारतीयसंस्कृत्यनुसारमियं पितृपूजा एका सामाजिकपरम्परारूपेण देवपितृमनुष्येषु इहलौकिक-परलौकिकसम्बन्धपरिकल्पनार्थमेव निर्दिष्टति। भारतदेशोऽयं संस्कृति-संस्कृतयोर्मूलाधारभुत एव। अत्रैव वर्णजातिधर्मनिर्विशेषेण इयं भारतीया संस्कृति: संरक्षिताऽस्ति। अस्या एव: परम्पराया: संस्कृतेश्चाधारभूता भवतीयं पितृदेवतोपासना। धर्मशास्त्रानुसारं गृहस्थानां कृते पञ्चमहायज्ञानां सुव्यवस्था कृतास्ति। अनिवार्यतया एतेषां महायज्ञानामनुष्ठानं धर्मपरायणैर्जनै: क्रियते। एषु पञ्चमहायज्ञेषु पितृयज्ञत्वेन श्राद्धस्य महती प्रसस्ति: वर्त्तते। देवपितृणां श्राद्धं विना इह ससारे मनुष्या: क्षणमपि स्थातुं नैवर्हन्ति। अस्यैव श्राद्धस्यावश्यकताविषये विभिन्नेषु सूत्र-स्मृति-भाष्य-निबन्धात्मकधर्मशाास्त्र-ग्रन्थेषु विस्तृतरूोण विचारो दरीदृश्यते।

मनुष्य: खलु सामाजिकप्राणी। संसारेऽस्मिन् जीविकानिर्वाहार्थं तस्मै श्रद्धया आवश्यकता नास्त्ीति न केनापि वक्तुं शक्यते। धर्मशास्त्रपद्धत्या श्रद्धया पितृणां स्मरण-पूजन- भोजनादिभि: परितोषणपूर्वकं तेषामाशिर्वादप्राप्तिरेव श्राद्धस्य प्रमुखमुद्देश्यम्। मनुमतानुसारं पितरौ ऋषिभ्य: उद्धुता:।देवा: मानवाश्च पितृभ्य: संजाता:, एतदर्थ परलोकगतानामेव पितृणां श्राद्धमस्माभि: क्रियते। अस्मादेवं स्पष्टं भवति यत्पितर: देवानामपि जनयितार इति। अतश्चैवं भूतानां पितृणां श्राद्धमवश्यमेवास्माभि: करणीयम्। शास्त्रदृष्ट्या श्रद्धायुक्त: सन् श्राद्धकरणेन श्राद्धकर्त्ता पितृणामाशिर्वादं प्राप्य धनधान्य प्रजास्तथा अन्यानपि कामान् सुलभेनावश्यनेव लभत: इति प्रमाणानि दरीदऋश्यन्ते। याज्ञवल्क्येन अस्मिन् विषये प्रतिपादितं यतं-

आयु: प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च।
प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहा।।[१] इति।

मनु मतानुसारं प्रमितपितृका: जना: यदि श्राद्धं नैव कुर्यु: तर्हि ते प्रायश्चित्तार्हा भवन्ति। यथा-

न निर्वपति य: श्राद्धं प्रमीतपितृकोद्विज:।
इन्दुक्षये मासि मासि प्रायाश्चित्ती भवेतु: स:।।[२]

भारतीयविश्वासानुसारं श्राद्धस्य प्रमुखं स्थानमस्ति।तस्याकरणे दोषापत्ते: यथा श्राद्धकल्पलतायां-
न सन्ति पितरश्चेति कृत्वा मनसि वर्त्तते।
श्राद्धान्न कुरुते यस्तु तस्य रक्तं पिबन्ति ते।।[३]
तत्रापि सुमन्तुवचनं तथा-

श्राद्धात्परतरनास्ति श्रेयस्करमुदाहृतम्।
तसमात्सर्वप्रत्नेन श्राद्धकुर्याद्विचक्षण:।।[४]

श्राद्धक्रियाकौमुद्यामपि षोडशश्राद्धाकरणे मनुष्य: पिशाचत्वं प्राप्नोति लिखितमस्ति। यथा –
यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश

**पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि।।**[५]

पितृद्देश्येन श्रद्धया द्रव्यत्यागः श्राद्धमित्युच्यते। गृहमेधिनां कृते मन्वादिभिर्महर्षिभिः परिकल्पिताः। पापनिवृत्तिरूपाः ये पञ्चमहायज्ञाः तेषु पितृयज्ञ एव श्राद्धपदवाच्यः। पितृयज्ञस्तु तर्पणमिति वचनात् श्रद्धाशब्दादेव श्राद्धस्योत्पत्तिः। श्रद्धया पित्रुद्देश्येन क्रियमाणं श्राद्धाख्यं कर्म दानरूपतां यागरूपताञ्च प्राप्नोतीति विप्रमिश्रस्याशयः। श्रद्धया क्रियमाणं कर्म श्राद्धमिति श्राद्धशब्दस्य यौगिकोऽर्थः इति केचिद् वदन्ति। श्रद्धामूलतया बहुनां कर्माणामनुष्ठानं कर्त्तुं शक्यते। पितृद्देश्येन श्रद्धया द्रव्यत्यागरूपं कर्म श्राद्धमिति पङ्कजादिशब्दवद् योगरूढोऽयं श्राद्धशब्दः। श्राद्धं पितृपूजेत्युच्यते। श्राद्धस्यावयवाः कल्पिता यथा-

होमश्च पिण्डदानं च तथा ब्राह्मणभोजनम्।
श्राद्धाशब्दभिधेयं स्यादेकस्मिन्नौपचारिके।।[६]

श्राद्धकल्पतायां[७] तु पित्रुद्देश्येन श्रद्धया त्यक्तस्य द्रव्यस्य ब्राह्मणैर्यत्स्वीकरणं तच्छ्राद्धमिति लिखितमस्ति।

वैवाहिकेऽग्नौ गृह्योक्तं कर्मं सायं प्रातः होमाष्टकादि यथाशास्त्रं संपाद्य पञ्चमहायज्ञान्तर्गतं वैश्वदेवाद्यनुष्ठानं प्रतिदिनं च कृत्वा गृहस्थः पाकं कुर्यात्। पशुवधस्थानं सूनेत्युच्यते। ताश्च चुल्लीपेषण्यादयः यान् स्थापयित्वा गुहस्थः पापेन वध्यते। तदर्थं पञ्चमहायज्ञाः प्रतिदिनमनुष्ठेयाः। यथा-

अध्यापनं ब्रह्मराज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।[८]

ते तु ब्रह्मापितृदेवभूतनृयज्ञाख्याः पञ्चविधाः। एतेषु पञ्चस्वपि पितृयज्ञस्यैव श्राद्धमित्यपरा संज्ञा । हिन्दूनामाचारेषु पितृयज्ञाख्यामिदं वैदिकं कर्मातीव महत्वपूर्णं स्थानं भजते।

श्राद्धस्य बहुनि लक्षणानि विद्यन्ते। यथा- पित्रुद्देश्येन द्रव्यत्यागः श्राद्धमिति भवति। तथाच विरमित्रोदयस्य श्राद्धप्रकाशे[९] – श्रद्धया दीयते यस्मात् तेन श्राद्धं निगद्यते।इति।

श्राद्धमयूखे यथा[१०] – मृतकोद्देश्यको विप्रस्वीकाराङ्गको द्रव्यत्यागः श्राद्धमिति।

कमलाकारभट्टो यथा [११] - ब्राह्मणस्वीकरान्तश्चतुर्थान्तपदोपनीतपित्रादुद्देश्यकत्यागः श्राद्धमित्यर्थः।

श्राद्धविवेके यथा[१२] - श्राद्धं नाम देवबोधितपात्रालम्भनपूर्वकप्रमितापित्रादिदेवतोद्देश्यको द्रव्यत्यागविशेषः।

ब्राह्मे यथा- देशे काले च पात्रे च श्रद्धया विधिना च यत्।
पितृन्नुद्दिश्य विपेभ्यो दत्तं श्राद्धमुदाहृतम्।।[१३]

श्रद्धया क्रियमाणं कर्म श्राद्धमिति श्राद्धशब्दस्य योगिकोर्थः। श्रद्धामूलतया बहुनां कर्मणामनुष्ठानं कर्त्तुं शक्यते । पित्रुद्देश्येन श्रद्या द्रव्यत्यागरुपं कर्मं श्राद्धमिति पङ्कजादिवद्योगरूढोऽयं श्राद्धशब्दः प्रथिता प्रेतकृत्यैषेति। मनुना[१४] कृतिसाध्यत्वेन श्राद्धस्य कर्मरूपत्वमुपदिष्टम्। तद्भावं गृहीत्वाऽऽपस्तम्बेन अथैतन्मनुः[१५] श्राद्धशब्दं कर्म प्रोवाचेति। तत्र विज्ञानेश्वराचार्यः श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देश्येन श्रद्धया त्यागः इत्याह। ब्राह्मणाधि- रूपाधिष्ठाने वसुरूद्रदित्यपितृमत्सोमांगिरसयमकव्यवाहनाग्निसोमाज्यपाग्नि-ष्वात्तादीनां महामहिम्नां पितृरूपाणां देवतानामाराधनमुच्यते, आराधनञ्च मनसः प्रीणनं, तस्य चोपायः श्राद्धलक्षणं कर्म इति हेमाद्रिः पितृनुद्दिश्य द्रव्यत्यागब्राह्मणस्वीकारपर्यन्तं श्राद्धमिति लक्ष्मीधरः। सम्बन्धपदोपनीतान् पित्रादिन् चतुर्थ्यन्तपदेनोद्दिश्य हविस्त्यागः श्राद्धमिति शूलपाणिः।

महाभारतेऽनुशासनपर्वाणि पितृशब्दवाच्यः पितृमेधशब्दः प्रयूक्तोऽस्ति यथा-

पितृमेधं कथं देव तन्मे शंसितुमर्हसि।
सर्वेषां पितरः पूज्याः सर्वसम्पत्प्रदायिनः।।
यथावृष्टिं प्रतीश्रयन्ते भूमिष्ठाः सर्वजन्तवः।
पितरश्च तथा लोके पितृमेधं शुभेक्षणे।।[१६] इति।

आयुः प्रजाद्यैहिकफलाभाय स्वर्गादिपारत्रिकफललाभाय सर्वोपरि मोक्षलाभाय न पितृणां यागो धर्मशास्त्रेषु विहितः। स च पितृयागः श्राद्धनाम्ना प्रसिद्धः। श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देश्येन श्रद्धया त्यागः इति विज्ञानेश्वरमतानुसारं[१७] प्रथमतया तच्छ्राद्धं द्विविधं पार्वणमेकोद्दिष्टं चेति। तत्र त्रिपुरुषोद्देश्येन यत् क्रियते तत्पार्वणम्। एकपुरूषोद्देश्येन क्रियमाणमोकोदिष्टम्। पुनश्च तत् त्रिविधं नित्य-नैमित्तिकं, काम्यं चेति। तत्र नित्यं नियतानिमित्तोपाधौ चोदितमहरहरमावास्याष्टकादिषु। अनियतनिमित्तोपादान चोदितं नैमित्तिकं यथा पुत्रजन्मादिषु। फलकामनोपाधौ विहितं काम्यं यथा स्वर्गादिकामानां कृत्तिकादिनक्षेत्रे तिथिषु च। पुनश्च पञ्चविधम्। अहरहः श्राद्धं पार्वणं वृद्धिश्राद्धेमेकोद्दिष्टं सपण्डीकरणं। तत्रारहः श्राद्धम् अत्रं पितृमनुष्येभ्यः इत्यादिनोक्तम्। तथा च मनुः - कुर्यादरहः श्राद्धमिति। तच्च श्राद्धं द्वादशविधेत्याह विश्वामित्रः-

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपण्डिनम्।
पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थष्टम्।।
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्।।[१८]

नित्यश्राद्धम्- नित्यश्राद्धम् अहरहः श्राद्धम्। तदष्टधा विभक्तस्य दिवसस्य पञ्चमे भागे अन्नादिना तदभागे जलेन वा कार्यम्। तदुक्तं मनुना-
कुर्यादहरहः श्राद्धमन्नाद्देनोदकेन वा।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्।।[१९] इति।

तच्च नित्यश्राद्धं विश्वदेवाङ्गभूतं षाट्पौरुषिकम्। तत्र अङ्गभागेन विश्वेषां देवानां संयोजनं नास्ति।

नैमित्तिकश्राद्धम्- अनियतनिमित्तोपाधा विहितं नैमित्तिकम्। तच्च पितृसांवत्सारिकं विवाहोपनयनादिषु विधेयम्। आभ्युदयिकमित्यादि। यदुक्तं गालवेन-

एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते।
तदप्यदैवं कर्त्तव्यंमयुग्मान् भोजयेद्विजान्।।[२०]

प्रेतश्राद्धम्- सर्वाणि प्रेतश्राद्धानि एकोद्दिष्टविधिना कार्याणि। एकपुरुषोद्देश्येन क्रियमाणं श्राद्धमेकोदिष्टम्। यथाह याज्ञवल्क्यः -

एकोदिष्टं देवहीनमेकार्घ्यैकपवित्रकम्।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत्।।[२१] इति।

तस्य कालो मध्याह्नः-

सपिण्डनम्- सपिण्डश्राद्धस्य नैमित्तिकत्वेऽपि प्रेतपित्रुभयार्थकतया पृथक् निर्देशः कृतः।

संक्रान्तिश्राद्धम्- संक्रान्तौ विहितं श्राद्धं पिण्डविरहितमेव कार्यम्।

सूर्यग्रहणे चन्द्रग्रहणे च आमेन हेम्ना वा श्राद्धं विद्धेयम्। हेमश्राद्धं तु पितृनुद्दिश्य हिरण्योत्सर्गमात्रम्।

एतच्छ्राद्धं त्वशौचमध्येऽपि ग्रहणयोगे कर्त्तव्यम्। दैवात्पित्रादिसांवत्सरिकश्राद्धकाले ग्रहणपाते आमादिना श्राद्धं कुर्यात्। तदुक्तं शातातपेन-

सांवत्सरिकम्- पित्रादीनां सांवत्सरिकश्राद्धमेकोद्दिष्टविधिना पार्वणविधिना वा कुलव्यवास्थाया कुर्यात्। एकोदिष्टकुलजातोऽपि सन्यासिपुत्रः पितृसांवत्सरिकं पार्वणमेव कुर्यात्। एकोद्दिष्टं यतेर्नास्ति इति वचनात्। अपुत्रस्य तु एकोद्दिष्टमेव।

पार्वणकुलजातस्यापि। संवत्सरिकपार्वणश्राद्धे कालसज्ञका: कामसंज्ञकाश्च। श्रा.क.ल.पृ.७। विश्वदेवा भवन्ति। तस्य काल: पञ्चधा विभक्तदिवसस्य चतुर्थभाग:।

प्रथमसंवत्सरे सपण्डीकरणं पर्यन्तम्द्कुम्भो देय:। द्वादशाहे अपकर्षपिण्डेन कृतेऽपि उदकुम्भादि देयमेव । यथा याज्ञवल्क्य:-

अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्ड़्वेत्।
थस्याप्यन्नं सोदकुम्भं दद्यात्सत्सरं द्विजे।।[२२]

वृद्धिश्राद्धं नैमित्तिकमपि अनुष्ठानभेदात् स्वतन्त्रतया प्रदर्शयिष्यते।

काम्यशाद्धम्- काम्यक्षाद्धं यत् – स्वर्गादिफलकामनया कृत्तिकादिनक्षत्रेषु शुभेषु तिथिषु च क्रियते। गालव: प्राह:-यथा-

कामाय विहितं काम्यमभिप्रेतार्थसिद्धये।
पार्वणेन विधानेन तदप्युक्तं खगाधीप।।[२३]

अत्र काम्यश्राद्धे धुरिसंज्ञका रोचनसंज्ञकाश्च विश्वदेवा:। तत्र पितर: मातामहश्च देवता:। तेन तत्षट्पुरुषिकं श्राद्धम्।

तिथ्यादीत्यत्र आदिपदेन तिथिनक्षत्रवारयोगकरणानां संग्रह:। फलकामनया तेषु श्राद्धं विहितमस्ति।

मन्वादयश्चतुर्दश आश्वयुक्शुक्लनवमी कार्त्तिकशुक्लद्वादशी प्रभृतय:।

युगादयश्चत्वार:। तत्र वैशाख शुक्लतृतीया सत्ययुगादि:, कार्त्तिकशुक्लनवमी त्रेतायुगादि:, आश्विन-कृष्णत्रयोदशी द्वापरयुगादि:, माघपौर्णमासी कलियुगादि:। माघामावास्येति मतान्तरम्। एषु पिण्डरहितं श्राद्धम्।

प्रदीपमावास्याश्राद्धं काम्यम्। श्राद्धेऽस्मिन् ऋतुदक्षवस्वादयो दशविश्वेदेवा:। सनकसनन्दादग्न: सप्त मनुष्या:। पितृमातृमातामहप्रमातामह: द्वादशदेवता:। सनातनधर्मे यावत्य: पूजापद्धतय: वर्त्तन्ते तास्तु सपण्डिश्राद्धमिति पदेन वक्तुं शक्यते। एवं प्रकारेण श्राद्धप्रयोजनता विषये मया आलोचना कृता।

**संदर्भ**


१. या.स्मृ.,श्लो. शं.२७०।
२. म.स्मृ.३/८।
३. श्रा.क.ल.,पृ.६।
४. तत्रैव,पृ.३।
५. श्रा.क्रि.कौ., पृ.३६२।
६. हिष्ट्रि अफ् धर्मशास्त्रम्, भा.४,पृ.३३५।
७. श्रा.क.ल.,पृ.३
८. म.स्मृ.३/७०।
९. वि.मि.,पृ.७।
१०.श्रा.म.,पृ.२।
११.नि.सि.,पृ.२६५।
१२.श्रा.वि.,पृ.१/८।
१३.श्रा.प्र.,पृ.३।
१४.म.स्मृ.३/१२७।
१५.आ,प,ध.सू.-२/१६/१।
१६.म.भा.अनु.प.-१४५।
१७.या.स्मृ.मिता., पृ.७४।
१८.नि.सि.,पृ.२६६।
१९.म.स्मृ.३/८२।
२०.या.स्मृ.१/२५१।
२१.श्रा.क.ल.,पृ.६।
२२.या.स्मृ.१/२५५।